"विप्रविद्धकुथावल्गाश्छिन्नभाण्डाः परासवः ।
सारोहास्तुरगाः पेतुर्मथिताः पार्थमार्गणैः ॥")
नष्टभाण्डस्य दण्डादिविधिर्यथा,—
"अराजदैविकं नष्टं भाण्डं दाप्यस्तु वाहकः ।
प्रस्थानविघ्नकृच्चैव प्रदाप्यो द्विगुणां भृतिम् ॥
भाण्डं व्यसनमागच्छेत् यदि वाहकदोषतः ।
दाप्यो यत् तत्र नश्येत्तु दैवराजकृतादृते ॥"
इति मिताक्षरायां नारदः ॥
नदीकूलद्वयमध्यम् । इति हेमचन्द्रः । ४ । ६२ ॥
(भण्डते इति । भडि+अच् । भण्डस्तस्य भावः इत्यण् ।) भण्डवृत्तिः । इत्यजयपालः ॥ भाँड़ामि इति भाषा ॥

भाण्डः, पुं, गर्द्दभाण्डवृक्षः । इति शब्दचन्द्रिका ॥

भाण्डपुटः, पुं, (भाण्डे पुटा यस्य ।) नापितः । इति जटाधरः ॥

भाण्डपुष्पः, पुं, सर्पविशेषः । तत्पर्य्यायः । कौकुटिकन्दलः २ । इति त्रिकाण्डशेषः ॥

भाण्डागारः, पुं, (भाण्डानां पात्रादीनामागारः ।) गृहविशेषः । भाँड़ार इति भाषा ॥ तत्पर्य्यायः । मन्थरः २ । इति शब्दमाला ॥ (यथा, महाभारते । १२ । ६९ । ५४ ।
"भाण्डागारायुधागारान् योधागारांश्च सर्व्वशः ।
अश्वागारान् गजागारान्बलाधिकरणानि च ॥")

भाण्डारी, [न्] पुं, (भाण्डारोऽधिकारित्वेनास्त्यस्येति । भाण्डार+इनिः ।) भाण्डाराध्यक्षः । भाँड़ारी इति भाषा । यथा, व्यवहारप्रदीपे ।
"क्षुधितस्तृषितः कामी विद्यार्थी क्षविकारकः ।
भाण्डारी च प्रवासी च सप्त सुप्तान् प्रबोधयेत् ॥

भाण्डिः, पुं, (भडि+इन् । पृषोदरादित्वात् साधुः ।) नापितस्य क्षुराद्याधारः । भाँड़ि इति भाषा । इति भाण्डिवाहशब्ददर्शनात् ॥

भाण्डिलः, पुं, (भाण्डिरस्त्यस्येति । भाण्डि+लच् ।) नापितः । इति शब्दमाला ॥

भाण्डिवाहः, पुं, (भाण्डिं क्षुराद्याधारं वहतीति । वह्+अण् ।) नापितः । इति शब्दमाला ॥

भाण्डीरः, पुं, (भण्ड+ईरन् । पृषोदरादित्वात् साधुः ।) वटवृक्षः । इति जटाधरः ॥ व्रजमण्डलान्तरे षोड़शवटवनमध्ये द्वितीयवटवनम् । यथा,—
"सङ्केतवटमादौ तु भाण्डीराख्यं वटं द्वयम् ॥"
इति नारायणभट्टकृतव्रजभक्तिविलासः ॥

भातं, क्ली, (भा दीप्तौ+क्तः ।) प्रभातम् । इति शब्दमाला ॥ (भा+भावे क्तः ।) दीप्तिः ॥ तद्वति, त्रि ॥

भातिः, स्त्री, (भा+क्तिन् ।) शोभा । इति राजनिर्घण्टः ॥ (यथा, श्रीमद्भागवते । ८ । १८ । १२ ।
"यत्तद्वपुर्भातिविभूषणायुधै-
रव्यक्तचिद्व्यक्तमधारयद्धरिः ।
बभूव तेनैव स वामनो वटुः
संपश्यतोर्दिव्यगतिर्यथा नटः ॥")

भातुः, पुं, (भातीति । भा+"कमिमनिजनिगाभायाहिभ्यश्च ।" उणा० १ । ७३ । इति तुः ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ दीप्तः । इति संक्षिप्तसारोणादिवृत्तिः ॥

भाद्रः, पुं, (भाद्री पौर्णमास्यस्मिन्निति । भाद्री+"साऽस्मिन् पौर्णमासीति ।" ४ । २ । २१ । इत्यण् ।) भाद्रपदनक्षत्रयुक्ता पौर्णमासी यस्मिन् मासे सः । वैशाखादिद्वादशमासान्तर्गतपञ्चममासः । तत्पर्य्यायः । नभस्यः २ प्रौष्ठपदः ३ भाद्रपदः ४ । इत्यमरः । १ । ४ । १७ ॥ स च द्विविधः । सिंहस्थरविकालः सौरः । १ । सिंहस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तो मुख्यचान्द्रः । कृष्णप्रतिपदादिपौर्णमास्यन्तो गौणचान्द्रः । २ । इति मलमासतत्त्वम् ॥ * ॥ तत्र जातफलम् ।
"नभस्यमासे खलु जन्म यस्य
धीरो मनोज्ञश्च वराङ्गनानाम् ।
रिपुप्रमाथी कुटिलोऽतिमर्म्मा
प्रपन्नभर्त्ता स भवेत् सहासः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
तत्र गोः प्रसवे नारदः ।
"भानौ सिंहगते चैव यस्य गौः सम्प्रसूयते ।
मरणं तस्य निर्द्दिष्टं षड्भिर्मासैर्न संशयः ॥
तत्र शान्तिं प्रवक्ष्यामि येन सम्पद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्व्वीत घृताक्तैः राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥"
व्याहृतिभिश्चायं होमः ।
"सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ॥"
इति ॥
तथा ।
"सिंहराशौ गते सूर्य्ये गोः प्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते दिवैवाश्वतरी तथा ।
तदानिष्टं भवेत् किञ्चित् तच्छान्त्यै शान्तिकं चरेत् ॥
अस्य वामेतिसूक्तेन तद्विष्णोरिति मन्त्रतः ।
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ॥
मृत्युञ्जयविधानेन जुहुयाच्च तथायुतम् ।
श्रीसूक्तेन ततः स्नायात् शान्तिसूक्तेन वा पुनः ॥
मध्यरात्रौ निशीथे वा यदा गौः क्रन्दते तदा ।
ग्रामे वाप्य गृहे वापि शान्तिकं पूर्व्ववद्विशेत् ॥"
संक्रमणोत्तरषोड़शदण्डात्मकपुण्यकालाभ्यन्तरे गोः प्रसवे विप्रसम्प्रदानकगोप्रदानपूर्व्वकशान्तिः कार्य्या इति विशेषः । तदतिरिक्तसिंहस्थरवौ गोः प्रसवे शान्तिमात्रं कर्त्तव्यं न गोः प्रदानम् । निर्णयसिन्धुधृताद्भुतसागरग्रन्थीयवचनजातमीमांसानुसारादिति ॥ * ॥ अथ भाद्रकृत्यम् । तत्र जन्माष्टमीव्रतप्रमाणन्तियितत्त्वेऽनुसन्धेयम् । श्रावणपौर्णमास्यनन्तरितभाद्रकृष्णाष्टम्यां रात्रिमध्ये मुहूर्त्ताष्टमीरोहिणीयोगरूपजयन्तीलाभे तत्रैवोपवासः । उभयदिने चेत्तदा परदिने । जयन्त्यलाभे तु रोहिणीयुक्ताष्टम्यां उभयदिने रोहिणीयुताष्टमीलाभे परदिने । रोहिण्यलाभे तु निशीथसम्बन्धिन्यामष्टम्याम् । उभयदिने निशीथसम्बन्धे तदसम्बन्धे वा परदिने इति । तत्र प्रयोगः पूर्व्वदिने संयमं विधाय तद्दिने कृतप्रातःस्नानादिराचान्तः । ॐ सूर्य्यः सोम इति पठित्वा ॐ तद्विष्णोः परमं पदमित्यादिमन्त्रेण नारायणं संस्तूय ॐ तत् सत् इत्युच्चार्य्य उदङ्मुखो दर्भहस्तस्ताम्रपात्रे कुशतिलजलान्यादाय ॐ अद्य भाद्रे मासि कृष्णे पक्षे अष्टम्यां तिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा विष्णुलोकप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीकृष्णजन्माष्टमीव्रतमहं करिष्ये इति संकल्पयेत् । यद्युपवासदिने प्रातः सप्तमी तदाष्टम्यां तिथौ इत्यत्र सप्तम्यां तिथावारभ्य इति वक्तव्यम् । ततः सामगस्तु ॐ देवो वो द्रविणोदा पूर्णां विवष्ट्वासिचं उद्वासिञ्चध्वमुपवा पृणध्वमादिद्वो देव ओहते । इति पठेत् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य
"ॐ वासुदेवं समुद्दिश्य सर्व्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्च्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यद्गोविन्द त्रियोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥
आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम् ।
तत् प्रणाशय गोविन्द ! प्रसीद पुरुषोत्तम ! ॥"
इति पठेत् ।
तत आह्निकं समाप्यार्द्धरात्रे तत्तत्प्रतिमासु पटादिषु वा आवाहनविसर्ज्जनसहितं शालग्रामे घटादिस्थजले वा आवाहनविसर्ज्जनरहितं पूजयेत् । ततो ध्यानम् ।
"मायापि बालकं सुप्तं पर्य्यङ्के स्तनपायिनम् ।
श्रीवत्सवक्षःपूर्णाङ्गं नीलोत्पलदलच्छविम् ॥"
इति ध्यात्वा श्रीकृष्ण स्वागतं इति पृच्छेत् । इदमासनं ॐ कृष्णाय नमः । इत्यासनं दत्त्वा एतत् पाद्यम् ॐ श्रीकृष्णाय नमः ॐ यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भवाय गोविन्दाय नमो नमः । इत्युच्चार्य्य इदमर्घ्यम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । ततो दधिमधुघृतात्मकं मधुपर्कमानीय एष मधुपर्कः ॐ श्रीकृष्णाय नमः । इदमाचमनीयम् ॐ श्रीकृष्णाय नमः । लौकिकषष्ट्यधिकशतत्रयतोलकपरिमितान्यूनं जलमानीय ॐ योगाय योगेश्वराय योगपतये योगसम्भवाय गोविन्दाय नमो नमः । इदं स्नानीयजलम् ॐ श्रीकृष्णाय नमः । इदं वस्त्रं इदमाभरणम् एष गन्धः इदं पुष्पम् एष धूपः एष दीपः इदं नैवेद्यम् ॐ विश्वाय विश्वेश्वराय विश्वपतये विश्वसम्भवाय गोविन्दाय नमो नमः । इत्यनेन नैवेद्यं दद्यात् स्नापयेच्च । ततो नमो देव्यै श्रियै नमः । इति मन्त्रेण श्रियं पूजयेत् । ततः स्वगृह्योक्तविधिनाग्निं संस्थाप्य घृततिलाभ्याम् । ॐ धर्म्माय धर्म्मेश्वराय धर्म्मपतये धर्म्मसम्भवाय